# Shiva Dhyanam

# શિવધ્યાનમ્

## Document Information

```
Text title : Shiva Dhyanam
File name : shivadhyAnam.itx
Category : shiva, shivarahasya, dhyAnam
Location : doc_shiva
Transliterated by : Ruma Dewan
Proofread by : Ruma Dewan
Description/comments : shrIshivarahasyam | bhavAkhyaH dvitIyAMshaH | adhyAyaH 5 | 1-17||
Latest update : September 16, 2023
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 16, 2023

*sanskritdocuments.org*

# શિવધ્યાનમ્

સમાહિતેન મનસા ધ્યાત્વૈવં પરમેશ્વરમ્ । ૧(૧)
ધ્યાયેત્સદાશિવં સાક્ષાદ્દેવં સકલનિષ્કલમ્ ॥ ૨(૨)॥

શુદ્ધસ્ફટિકસઙ્કાશં ત્રિનેત્રં શીતલદ્યુતિમ્ ।
વિદ્યુદ્વલયસઙ્કાશં જટામકુટભૂષિતમ્ ॥ ૩॥

શાર્દૂલચર્મવસનં કિઞ્ચિસ્સ્મિતમુખામ્બુજમ્ ।
રક્તપદ્મનદલપ્રખ્યપાણિપાદતલાધરમ્ ॥ ૪॥

સર્વલક્ષણસમ્પન્નં સર્વાભરણભૂષિતમ્ ।
દિવ્યાયુધધરૈર્યુક્તં (દિવ્યાયુધધરં દેવં) દિવ્યગન્ધાનુલેપનમ્ ॥ ૫॥

પઞ્ચવક્ત્રં દશભુજમિન્દુખણ્ડશિખા(શિરો)મણિમ્ ।
અસ્ય પૂર્વમુખં સૌમ્યં બાલસૂર્યસમચ્છવિમ્(સમચછવિ) ॥ ૬॥

ત્રિલોચનારવિન્દાઢ્યં સોમધામર્ધશેખરમ્ ।
દક્ષિણં નીલજીમૂતસમાનરુચિરપ્રભમ્ ॥ ૭॥

ભ્રુકુટીકુટિલં ઘોરં રક્તવૃત્તત્રિલોચનમ્ ।
દંષ્ટ્રાકરાલં વિલસત્સ્ફુરિતાધરપલ્લવમ્ ॥ ૮॥
(દંષ્ટ્રાકરાલેન્દુલસત્સ્ફુરિતાધરપલ્લવમ્) ॥ ૮॥

ઉત્તરં વિદ્રુમપ્રખ્યં નીલાલકવિભૂષિતમ્ ।
સવિલાસં ત્રિણયનં ચઞ્ચચ્ચન્દ્રકલાધરમ્ ॥ ૯॥

પશ્ચિમં સૂર્યચન્દ્રાભં લોચનત્રિતયોજ્જ્વલમ્(જ્વલમ્) ।
ચન્દ્રરેખાધરં સૌમ્યં મન્દસ્મિતમનોહરમ્ ॥ ૧૦॥

પઞ્ચમં સ્ફટિકપ્રખ્યમિન્દુરેખાકલાધરમ્ ।
અતીવ સૌમ્યમુત્ફુલ્લસોમસૂર્યાનલાક્ષિકમ્ ॥ ૧૧॥
(અતીવ સૌમ્યમુત્ફુલ્લસોમસૂર્યાગ્નિચક્ષુષમ્) ॥ ૧૧॥

દક્ષિણે શૂલપરશું વજખડ્ગાનલોજ્વલમ્ ।
સવ્યે પરશ્યુનારાચઘણ્ટાપાશાઙ્કુશોજ્જ્વલમ્(જ્વલમ્) ॥ ૧૨॥

નિવૃત્યા જાનુસમ્બદ્ધમાનાભેશ્ચ પ્રતિષ્ઠયા ।
આકણ્ઠં વિદ્યયા તદ્વદાલલાટં તુ શાન્તયા ॥ ૧૩॥

તદૂર્ધ્વં શાન્ત્યતીતાખ્યકલયા(ऽ)પારયા તથા ।
પઞ્ચોર્ધ્વં (પઞ્ચોર્ધ્વ) વ્યાપકં તસ્માત્કલાપઞ્ચકવિગ્રહમ્ ॥ ૧૪॥

ઈશાનમુત્કટં (ઈશાનમકુટં) દેવં પુરુષાસ્યં મહેશ્વરમ્ ।
અઘોરહૃદયં તદ્વદ્વામગુહ્યં સદાશિવમ્ ॥ ૧૫॥

સદ્યોજાતપદં મૂર્તિમષ્ટત્રિંશત્કલામયમ્ ।
માતૃકામયમીશાનં પઞ્ચબ્રહ્મમયં તથા ॥ ૧૬॥

ઓઙ્કારાખ્યમયં ચૈવ હંસશક્ત્યા સમાયુતમ્ ।
પઞ્ચાક્ષરમયં દેવં ષડક્ષરમયં તથા ॥ ૧૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ભવાખ્યે શિવધ્યાનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભવાખ્યઃ દ્વિતીયાંશઃ । અધ્યાયઃ ૫ । ૧-૧૭॥

- .. shrIshivarahasyam . bhavAkhyaH dvitIyAMshaH . adhyAyaH 5 . 1-17..

Notes:

Selected verses pertaining to ŚivadhyānaM શિવધ્યાનમ્
that form a part of the worship of Śiva શિવ,
are presented here.

Proofread by Ruma Dewan

*Shiva Dhyanam*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*